॥ শিৰমানসপূজা ॥

ৰত্নৈঃ কল্পিতমাসনং হিমজলৈঃ স্নানং চ দিৰযাম্বরং
নানারত্নৰিভূষিতং মৃগমদামোদাঙ্কিতং চন্দনম্ .
জাতীচম্পকবিল্ৰপত্ররচিতং পুষ্পং চ ধুপং তথা
দীপং দেৰ দযানিধে পশুপতে হৃত্কল্পিতং গৃহ্যতাম্ .. ১..
সৌৰৰেণ নৰরত্নখণ্ডরচিতে পাত্রে ঘৃতং পাযসং
ভক্ষ্যং পঞ্চৰিধং পযোদধিযুতং রম্ভাফলং পানকম্ .
শাকানামযুতং জলং রুচিকরং করপুরখণ্ডোজ্জ্ৱলং
তাম্বুলং মনসা মযা ৰিরচিতং ভক্ত্যা প্রভো স্ৱীকুরু .. ২..
ছত্রং চামরযোর্যুগং ৰযজনকং চাদরশকং নিরমলম্
ৰীণাভেরিমৃদঙ্গকাহলকলা গীতং চ নৃত্যং তথা .
সাষ্টাঙ্গং প্রণতিঃ স্তুতিরবহুৰিধা হ্যেতত্সমস্তং মযা
সঙ্কল্পেন সমরিপতং তৰ ৰিভো পূজাং গৃহাণ প্রভো .. ৩..
আত্মা ত্ৰং গিরিজা মতিঃ সহচরাঃ প্রাণাঃ শরীরং গৃহং
পূজা তে ৰিষযোপভোগরচনা নিদ্রা সমাধিস্থিতিঃ .
সঞ্চারঃ পদযোঃ প্রদক্ষিণৰিধিঃ স্তোত্রাণি সরৰা গিরো
যদ্যত্করম করোমি তত্তদখিলং শম্ভো তৰারাধনম্ .. ৪..
করচরণ কৃতং ৰাক্কাযজং করমজং ৰা .
শ্রৰণনযনজং ৰা মানসং ৰাপরাধম্ .
ৰিহিতমৰিহিতং ৰা সরৰমেতত্ক্ষমস্ৰ .
জয জয করুণাব্ধে শ্রীমহাদেৰশম্ভো .. ৫..
.. ইতি শ্রীমচ্ছঙ্করাচার্যৰিরচিতা শিৰমানসপূজা সমাপ্তা..